# शिक्षामन्त्रालयस्यापरसचिवेन विहितं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुणोत्कर्षनिरीक्षणम्




केन्द्रीयसंस्कृतविश्वविद्यालयः शिक्षामन्त्रालयान्तर्गतः सर्वोच्चकेन्द्रीयसंस्कृतविश्वविद्यालयः इत्यतः अस्य गुणोत्कर्षनिरीक्षणं काले काले सम्भवति। तदनु शिक्षामन्त्रालयस्य उच्चशिक्षाविभागस्यापरसचिवः श्रीसुनीलकुमारबर्णवालः विश्वविद्यालयस्य गुणोत्कर्षनिरीक्षणाय देहलीस्थं मुख्यालयं समागच्छत्। आभारतं व्याप्तस्य बहुपरिसरीयस्य बहुशाखासमन्वितस्य च अस्य प्रगतिं दर्शं दर्शं सन्तृप्तोऽभूत् । इदम्प्रथमतया समागतम् अपरसचिवं कुलपतिप्रमुखाः पूर्णकुम्भेन सह समाह्वयन्। वैदिकमङ्गलघोषेण सरस्वत्याः समाराधनेन च समारब्धः एषः निरीक्षणकार्यक्रमः सारस्वतसभागारे औपचारिकरूपेण पञ्चदशे दिनाङ्के (15/11/2024) प्रातः सर्वसम्मुखे सुसम्पन्नः।

नानाविधासु परीक्षासु स्वर्णपदकैः सह सर्वप्रथमस्थानम् अलङ्कृत्य नानामन्त्रालयेषु कार्यं कृतवतः डा.सुनीलकुमारबर्णवालस्य अनितरसाधरणं कौशलं कुलसचिवः प्रो.रा.गा.मुरलीकृष्णवर्यः स्वागतसमये उपावर्णयत्।






तदग्रे संस्कृतेन संवादं कुर्वद्भिः विविधपरिसरच्छात्रैः सह अपरसचिवः संवादमकरोत्। विश्वविद्यालयस्य वरिष्ठाचार्यः आचार्यः सर्वनारायणझावर्यः ज्योतिर्विज्ञानस्य ज्यौतिषभौतशास्त्रस्य च प्रारम्भणाय विश्वविद्यालयः अग्रेसरः वर्तते इति अभिनवविषयं सभामुखम् उपास्थापयत्। तदग्रे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः प्रगतिविशेषं गुणोत्कर्षविशेषं च सविस्तरं सचित्रं च प्रास्तौत्। ततः परिसराणां सर्वाङ्गीणविकासाय राष्ट्रपतिपुरस्काराद्यानां केन्द्रीययोजनानां पुनरारम्भणाय मुक्तदूरस्थशिक्षाव्यवस्थायाः स्तरोन्नयनाय दिल्लीपरिसरस्य नासिकपरिसरस्य प्रयागराजपरिसरस्य श्रृङ्गगिरिपरिसरस्य एकलव्यपरिसरस्य तदितरेषामपि भौतिकविकासाय मन्त्रालयपक्षतः सर्वविधसहयोगं दातुं अपरसचिववर्यः अङ्ग्यकरोत्। सर्वकारीये समर्थनामके जालपुटे नामाङ्कनप्रवेशपरीक्षाद्याः सर्वाः प्रक्रियाः सुष्ठु प्रवर्तन्ते इति स्वतः विज्ञाय अतीव प्रसन्नोऽभूत् । संस्कृत-ओलम्पियाड्, गीता-ओलम्पियाड्, कला-ओलम्पियाड् इत्यादिषु अभिनवोपक्रमेषु विश्वविद्यालयस्य अभिरुचिं मुक्तकण्ठेन प्राशंसत्। केन्द्रीयसंस्कृतविश्वविद्यालयः NAAC इत्यनया सर्वोत्कृष्टस्तरमवाप्तोऽस्ति। अतः इतरैः समशीर्षकैः सामान्यविश्वविद्यालयैः अनुबन्धं संस्थाप्य छात्रेभ्यः प्रवेशाध्ययनेषु समधिकमवसरं कल्पयितुं शक्नोति। विविधपाठ्यक्रमान् विविधोच्चविश्वविद्यालयेषु स्वेच्छया यथासमयं च अध्येतुं गुणाङ्कानाम् आदनप्रदानार्थं च अवसरं कल्पयन्तु इत्यपि अपरसचिवः परामर्शं प्रायच्छत्।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सूत्रधारस्य वरखेडीवर्यस्य मार्गदर्शने आदौ एकस्मिन् देशविशेषे अन्ताराष्ट्रियम् अध्ययनानुसन्धानकेन्द्रं प्रतिष्ठापयितुं शक्यते । तत्रत्यां प्रतिपुष्टिमवलोक्य अन्यत्रापि क्रमशः विस्तारः शक्यः। IIT Madras, IIT Delhi इत्याद्याः उच्चशिक्षासंस्थाः विदेशेषु अपि स्वीयं केन्द्रं प्रतिष्ठापयन्तः सन्ति। अतः सोत्साहानां भवतां साध्यमिदमिति अपरसचिवः अवदत्।

वेतनकेन्द्रितोद्योगापेक्षया ज्ञानकेन्द्रितस्य उद्योगस्य अवसराणां च सर्जनाय अयं विश्वविद्यालयः समर्थोऽस्ति। अतः एतद्दिशि अस्माकं सहयोगः सदैव भविष्यति इत्यपि महोदयः अवदत्। विश्वविद्यालयस्य ग्रन्थालयसौकर्यविषये प्रकाशनविषये रिक्तपदपूरणविषये वित्तीयप्रबन्धनविषये केन्द्रीययोजनानां क्रियान्वयनविषये च सर्वेऽपि अधिकारिणः प्रतिपुष्टिं प्रायच्छन् । चीनदेशात् सद्यः समागतः विश्वविद्यालयस्य प्रकाशननिदेशकः प्रो.काशीनाथन्योपानेवर्यः वैदेशिकानां संस्कृताध्ययनासक्तिं तत्र च विश्वविद्यालयस्य सम्भावितभूमिकां चाधिकृत्य सविस्तरमवदत्। तमिलुनाडुराज्ये तेलङ्गाणराज्ये पूर्वोत्तरराज्येषु गुजराते तदितरेष्वपि राज्येषु आदर्शमहाविद्यालयानां प्रतिष्ठापनाय विश्वविद्यालयेन यत्नः आरब्धोऽस्ति इति विज्ञाय विश्वविद्यालयपरिवारम् अभ्यनन्दत् । विरामदिवसेऽपि समुपस्थितं बृहत्परिवारं दृष्ट्वा अपरसचिववर्यः ( IAS ) भृशं प्राशंसत्। विश्वविद्यालयस्य शोधाधिष्ठाता प्रयागराजपरिसरस्य निदेशकश्च आचार्यललितकुमारत्रिपाठिवर्यः अत्र संवादे स्वीयान् परामर्शान् प्रायच्छत्।






प्रो.कुलदीपवर्येण सञ्चालिते अस्मिन् निरीक्षणकार्यक्रमे कुलगुरुगणस्य सर्वेऽपि कर्मठाः आचार्याः सदस्याः च उपस्थिताः आसन्।

**निरीक्षणसारसङ्ग्रहः**

आचार्यः गणेशतिम्मण्णपण्डितः

संयुक्तनिदेशकः

शैक्षणिकपरियोजना, प्रकाशनविभागः

सहयोगः

श्रीविनयकुमारशुक्लः

शोधसहायकः

दिनाङ्कः- 15/11/2024

**स्थानम्- सारस्वतसभागारः**

केन्द्रीयसंस्कृतविश्वविद्यालयः